# सुन्दरकाण्ड अष्टादशः सर्गः(१८) - ॥ रावणागमनम् ॥

तथा विप्रेक्ष माणस्य वनं पुष्पित पादपम् ।
विचिन्वतश्च वैदेहीं किञ्चिच् छेषा निशाभवत् ॥ १ ॥

षडङ्ग वेद विदुषां क्रतु प्रवर याजिनाम् ।
शुश्राव ब्रह्म घोषांश्च विरात्रे ब्रह्म रक्षसाम् ॥ २ ॥

अथ मङ्गल वादित्रैः शब्दैः श्रोत्र मनोहरैः ।
प्राबुध्यत महाबाहुर् दशग्रीवो महाबलः ॥ ३ ॥

विबुध्य तु यथाकालं राक्षसेन्द्रः प्रतापवान् ।
स्रस्त माल्याम्बर धरो वैदेही मन्व चिन्तयत् ॥ ४ ॥

भृशं नियुक्तस् तस्यां च मदनेन मदोत्कटः ।
न स तं राक्षसः कामं शशाकात्मनि गूहितुम् ॥ ५ ॥

स सर्वाभरणैर् युक्तो बिभ्रच्छ्रिय मनुत्तमाम् ।
तां नगैर् बहुभिर् जुष्टां सर्वपुष्प फलोपगैः ॥ ६ ॥

वृतां पुष्करिणीभिश्च नाना पुष्पोप शोभिताम् ।
सदामदैश्च विहगैर् विचित्रां परमाद्भुताम् ॥ ७ ॥

ईहा मृगैश्च विविधैर् जुष्टां दृष्टि मनोहरैः ।
वीथीः सम्प्रेक्षमाणश्च मणि काञ्चन तोरणाः ॥ ८ ॥

नाना मृगगणा कीर्णां फलैः प्रपतितै वृंताम् ।
अशोक वनिकामेव प्राविशत् सन्तत द्रुमाम् ॥ ९ ॥

अङ्गना शत मात्रं तु तं व्रजन्त मनुव्रजत् ।
महेन्द्रमिव पौलस्त्यं देव गन्धर्व योषितः ॥ १० ॥

दीपिकाः काञ्चनीः काश्चिज् जगृहुस् तत्र योषितः ।
वाल व्यजन हस्ताश्च ताल वृन्तानि चापराः ॥ ११ ॥

काञ्चनैरपि भृङ्गारैर् जहुः सलिल मग्रतः ।
मण्डलाग्रान् बृसींश्चैव गृह्यान्याः पृष्ठतो ययुः ॥ १२ ॥

काचिद् रत्नमयीं स्थालीं पूर्णां पानस्य भामिनी ।
दक्षिणा दक्षिणे नैव तदा जग्राह पाणिना ॥ १३ ॥

राजहंस प्रतीकाशं छत्रं पूर्ण शशि प्रभम् ।
सौवर्ण दण्ड मपरा गृहीत्वा पृष्ठतो ययौ ॥ १४ ॥

निद्रामद परीताक्ष्यो रावणस्योत्तमाः स्त्रियः ।
अनुजग्मुः पतिं वीरं घनं विद्युल्लता इव ॥ १५ ॥

व्याविद्ध हार केयूराः समामृदित वर्णकाः ।
समागलित केशान्ताः सस्वेद वदनास् तथा ॥ १६ ॥

घूर्णन्त्यो मद शेषेण निद्रया च शुभाननाः ।
स्वेद क्लिष्टाङ्ग कुसुमाः सुमाल्या कुलमूर्धजाः ॥ १७ ॥

प्रयान्तं नैर्ऋत पतिं नार्यो मदिर लोचनाः ।
बहुमानाच्च कामाच्च प्रिया भार्यास्त मन्वयुः ॥ १८ ॥

स च कामपराधीनः पतिस्तासां महाबलः ।
सीता सक्तमना मन्दो मदाञ्चित गतिर्बभौ ॥ १९ ॥

ततः काञ्चीनिनादं च नूपुराणां च निःस्वनम् ।
शुश्राव परम स्त्रीणां स कपिर् मारुतात्मजः ॥ २० ॥

तं चाप्रति मकर्माण मचिन्त्य बल पौरुषम् ।
द्वार देश मनुप्राप्तं ददर्श हनुमान्कपिः ॥ २१ ॥

दीपिकाभि रनेकाभिः समन्ता दवभासितम् ।
गन्धतैलाव सिक्ताभिर् ध्रियमाणाभि रग्रतः ॥ २२ ॥

काम दर्प मदैर् युक्तं जिह्म ताम्राय तेक्षणम् ।
समक्षमिव कन्दर्प मपविद्ध शरासनम् ॥ २३ ॥

मथितामृत फेनाभ मरजो वस्त्र मुत्तमम् ।
सलील मनुकर्षन्तं विमुक्तं सक्त मङ्गदे ॥ २४ ॥

तं पत्रविटपे लीनः पत्र पुष्प घनावृतः ।
समीपमिव सङ्क्रान्तं निध्यातु मुपचक्रमे ॥ २५ ॥

अवेक्षमाणस्तु ततो ददर्श कपि कुञ्जरः ।
रूप यौवन सम्पन्ना रावणस्य वरस्तियः ॥ २६ ॥

ताभिः परिवृतो राजा सुरूपाभिर् महायशाः ।
तन्मृग द्विज सङ्घुष्टं प्रविष्टः प्रमदावनम् ॥ २७ ॥

क्षीबो विचित्राभरणः शङ्कु कर्णो महाबलः ।
तेन विश्रवसः पुत्रः स दृष्टो राक्षसाधिपः ॥ २८ ॥

वृतः परम नारीभिस् ताराभि रिव चन्द्रामाः ।
तं ददर्श महातेजास् तेजोवन्तं महाकपिः ॥ २९ ॥

रावणोऽयं महाबाहु रिति सञ्चिन्त्य वानरः ।

सोयमेव पुरा शेते पुरमध्ये गृहोत्तमे
अवप्लुतो महातेजा हनुमान् मारुतात्मजः ॥ ३० ॥

स तथाऽप्युग्र तेजाः सन् निर्धूतस् तस्य तेजसा ।
पत्रगुह्यान्तरे सक्तो हनुमान् संवृतोऽभवत् ॥ ३१ ॥

स तामसित केशान्तां सुश्रोणीं संहत स्तनीम् ।
दिद्दक्षु रसितापाङ्गा मुपावर्तत रावणः ॥ ३२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे अष्टादशः सर्गः ॥ १८ ॥